## ।। अथ एकोनविंशोऽध्याय: ।। chapter-19

वसिष्ठ उवाच :- ततो गच्छेन्नृपश्रेष्ठ सर: कैरातमुत्तमम्।
यत्र स्नानादपि नरो रूपं प्राप्नोत्यनुत्तमम्।। १

किरातो भिंभिरो नाम पूर्वमत्रार्बुदाचलात् ।
आनाल्पियङ्गुपुष्पाणि विक्रेतुं सह भार्यया ।। २

आरात् श्रीमालमुद्दीक्ष्य भार्यामिदमुवाच स: ।
प्रिये शुल्कान्यपीमानि महार्घाणि भवन्ति वै ।।
गन्धवस्तूपयोगीनि जायन्ते इति न: श्रुतम् ।। ३

एतद्भवेन वित्तेन कारयिष्यामि सायकान् ।
तै: करिष्येऽथ पापर्द्धिं सुखेनैवार्बुदे गिरौ ।। ४

इत्युक्त्वाथ प्रियां भार्यां किरातो भिंभिरस्तदा ।
प्रविवेश पुरद्वारि सुविस्तीर्णं चतुष्पथम् ।। ५

पूर्वस्यां पणसंस्थानसंबाधं समभायतम्।
क्रयविक्रयसंकीर्णमापणश्रेणिमण्डितम् ।। ६

-०-

ई १ शुल्के, १ २ ई इतिनश्रुतं ३ ई एतद्भवेनवित्तकारयिष्यामिकारयकान्
४ ई प्रिया, ५ ई विस्तीर्णचतुष्पथं , ६ ई संबोधं
७ ई आपणं
(ए १) पदं
(ए२) ्स्थाय

दीनारैर्दशभिर्दत्त्वा पुष्पाणि वणिजे नृप[1] ॥
ततो[2] ययौ प्रियायुक्तो वीक्षितुं पुरसत्तमम्[3] ॥ ७

गच्छन्तमथ तं द्वारि द्वारपालोऽभ्यभाषत ॥ ८

द्वारपाल उवाच :- नागन्तव्यमहो मध्ये बहिरेव स्थितिं कुरु ।
वसन्तीह श्रियः पूज्या देवानां च द्विजोत्तमाः[4] ॥ ९

न प्रवेशोऽस्ति ते मूढ श्रीमाले[5] देवतास्थले ।
वर्णसंकरजातानां शूद्राणां पापचेतसाम् ॥ १०

पिशुनानां कृतघ्नानां मूर्खाणामतपस्विनाम् ।
नास्तिकानां नृशंसानां तथा प्राकृतवादिनाम् ॥ ११

वेदविद्याविहीनानां परभाष्यशीलिनाम् ।
परदाररतानां च निर्वीराधोपजीवनाम् ॥ १२
श्रीमाले न प्रवेशोऽस्ति त्वादृशस्य च का कथा ॥ १३

-०-

३ बी पुरसत्तमम्
१ ई नृपस्तया
२ ई ततोययुप्रियायुक्ति वीक्षातांस्तकुत्तमं
३ ई तः ४ ई त्तमा ५ ई श्रीमाले देववल्लें ।

किरात उवाच :- विक्रेतुमहमायात: प्रियंगुकुसुमान्युत ।
न जानामि पुरस्यैतन् माहात्म्यं श्रीकृतस्यवै ।। १४

वसिष्ठ उवाच :- इत्युक्त्वा फिञ्भिकारो राजन् किराती भार्यया सह।
व्यपसर्पम्दयाचस्य द्वारपालस्य सत्वरम् ।। १५

अथ तस्य सखा कश्चिदाभीर: संगतस्तदा ।।
स तेन सममालापं मुहूर्तं भ्रिञ्भिकारो करोत् ।। १६

किराती च तृषाक्रान्ता नातिदूरे जगाम ह ।। १७

दृष्ट्वा बकवुलाकीर्णमिखातायां क्षितौ पय: ।
उत्सुका पातुकामा सा पिच्छिले पतिता नृप ।। १८

पंकमध्याजलक्लिन्ना कृच्छ्रादुत्थाय भामिनी ।।
वीक्षते यावदात्मानं वैलक्ष्यं परमं गता ।। १९

तावत्कनकवर्णानि पश्यत्यंगानि सर्वत: ।
मौक्तिकान्यभवन् गुञ्जा: कौशेयानि तक्त्वच: ।
मृगास्थीनि च हैमानि सर्वा जातानि पार्थिव ।। २०।२१

-०-

१ ई व्यपा
२ ई आभीर:
३ ई महा
४ ई निहमानि

अथाजगाम तां द्रष्टुं[ह१] किञ्किरी जीवितेश्वरीम्।
पुरमार्गसहस्रेऽस्मिन्नसौ[१] मां प्राप्नुयादिति ।। २२

ततो वारिलठे तन्वीं पद्मपत्रनिभेक्षणाम्।
बिम्बोष्ठीं विपुलश्रोणीं पीनोन्नतपयोधराम्[२]।। २३

चन्द्रबिम्बमुखीं श्यामां संहताङ्गं मनोरमाम्।।
मुक्तामणिमयीं मालां बिभ्रतीं स्वर्णभूषणाम् ।।
ददर्श विस्मितमना:[३] किरातस्तामवोचत् ।। २४

किञ्किरउवाच :- [illegible] ।। देवि काचित्किरातीह दृष्टा यदि भवेत्त्वया ।
तदाचक्ष्व विशालाक्षि प्रसादसुमुखी भव ।। २५

किरात्युवाच :- अहं नाथ प्रिया भार्या तव सा यां तु पृच्छसि[ह२] ।
तृषार्ताऽत्र जलं पातुमागता पतिता पुनः ।। २६

तीर्थस्यास्य प्रभावेण रूपमेतदभून्मम[४] ।। २७

-0-

१ ई स्मिन्नसामां

२ ई पीना

३ ई मना किरात

४ ई रूपमेवमभून्मम

(ह१) द्रष्टुं

(ह२) पृच्छसि

तद्भवानपि तीर्थेऽस्मिन् करोतु स्नानमाकुल: । ।
एवं रूपगुणोपेतो यथा भवति निश्चितम् ।। २८

वसिष्ठ उवाच :- तदाकर्ण्य प्रियावाक्यं भिञ्झिरी रूपलिप्सया[ए१] ।
निममज्ज जले तस्मिन् स्मरन् देवं महेश्वरम् ।। २९

निर्गतो[1]ऽथ जलात्तस्मादात्मानं तादृगेव हि ।
वीक्षमाणः[2] परं खेदमगमद्[3]व्यथितालय: ।। ३०

सुचिरं चिन्तयामास शोकव्याकुलितेन्द्रिय: ।
अहो सन्ति न पुण्यानि मम मन्द-स्यक कीर्हिचित् ।। ३१

श्रद्धास्नातस्य[4] मे यस्मान्न जातं रूपमीदृशम् ।
इयं तृणार्ता पतिता जलेऽस्मिन् कर्दमाकुले ।
भावहीनापि दिव्यांगी जाता तेनास्मि पापभाक्[5] ।। ३२

-०-०-

३ ई बी खेदमगमत् पर्वतालये ।
५ ई बी पापकृत्
१ ई निर्गर्यात्तोथजलात्तस्मा
२ माणापरं
४ ई श्रद्धाक्तांपिमेयस्मा

(ए१) रूपलीप्सया

एकत्रापि नरौ स्यातामल्पभाग्यानुभाग्यकौ ।
नसिद्धिर्मन्दभाग्यस्य बहुभाग्यस्तु सिध्यति ।। ३३

ततोऽहंक दुःखविधुरः कथं द्रक्ष्यामि तन्मुखम् ।
तां निरीक्ष्य सरोजाक्षीं स्पृहयन्त्यपि भूभुजः ।। ३४

तस्मादिहैव मोक्ष्यामि प्रियान्-प्राणानसंशयः ।
भवान्तरेपि येन स्यान्मम कल्याणमुत्तमम् ।। ३५

वसिष्ठ उवाच :- इति ध्यात्वा किरातोऽसौ भिज्भिरो मनुजेश्वर ।
वेगात् पपात तीर्थेऽस्मिन् गाढं बद्धा गले शिलाम्।। ३६

अथ सा त्वरिता मैवं मैवमित्युक्तवादिनी ।।
प्राप्ता सुचरिता तावत्पपात च ममार च ।। ३७

ततः साकृष्य बाहुभ्यां शोकार्ता पंकिलाज्जलात् ।
बहिश्चकार दयितं मृतं विवृतलोचनम्।। ३८

-0-

२ बी ई सी मल्पभाग्यानुभाग्यकौ
१ ई तांअल्य
३ ई अल्य ४ ई यां
५ ई स्त
६ ई वाक्तिनी
७ ई सुरत
८ ई पातस्स

(ए १) नान

कम्पमानतनुस्तन्वी निषादं त्यक्तजीवितम्[1] ।
अवाङ्मुखं पतिं वीक्ष्य विललाप सुदुःखिता ॥ ३९

किरात्युवाच:- अहो धिग्धिक् रूपेण किमनेन करोम्यहं ।
त्वां विना प्राणनाथं हि[2] वृथाभूतेन सम्प्रति ॥ ४०

एतन्मे निष्फलं जातं रूपमद्भुतदर्शनम् ।
यथारूपं कुमुद्वत्या[3] पद्मं हन्त सितेतरे ॥ ४१

इयं मनोहरा वाणी मत्तकोकिलमञ्जुला ।
विविक्ते कस्य चाटूनि करिष्यति ममाधुना ॥ ४२

कुरूपोऽपि किरातोऽपि दरिद्रोऽपि भवान् मम[ए१] ।
किरातगतिरेवास्ति गतो वपुरिदं तव ॥ ४३

मितं ददाति हि पिता मितं भ्राता मितं सुतः ।
अमितस्य च दातारं[4] भर्तारं का न पूजयेत् ॥ ४४

-०- ०-०-

१ बी निषाद
ई कंपमानस्तनुस्तस्वीविषादन्यक्त
२ ई हिः वृथाभूतेन प्रति । ३ ई व्दत्याः पद्मं हंतसि
४ ई तस्यहिदातारंभर्ता
ए १ मम्

सुहृदोऽबुद्धिशृंगस्था मार्गभागक्तस्तव ।
आर्ता विलोकयिष्यन्ति पितरौ च जरातुरौ ।। ४५

विंवं प्रियङ्गुपुष्पाणामाबद्धं यत्पटाञ्चले ।
तत्थैवास्ति[1] मे नाथ तेन कार्य सायकान् ।। ४६

कौ मे मायूरपिच्छस्य गुञ्जाफलमयस्य च ।
गुहागृहे निविष्टाया[2] भूषणास्य विधानकृत् ।। ४७

अहं तस्मात्[3] त्वया हीना न यास्यामि गृहं प्रति ।
इहैव भवता सार्द्धं प्रवेक्ष्यामि[4] हुताशनम् ।। ४८

वसिष्ठ उवाच :- इत्थं विलप्य बहुधा किराती भिल्लभर्तृप्रिया ।
चितां चकार तत्राशु शुचिः स्नात्वा समाहिता ।। ४९

अथागात्ब्राह्मणश्रेष्ठः कौशिको वेदविन्मुनिः ।
कमण्डलुधरो दण्डी वल्काजिनसम्वृतः ।।
अब्रवीच्च वरारोहां पतिशोकसमाकुलाम् ।। ५०

-0-0-

४ बी प्रविशामि

१ ई वास्तमे

२ ई विनिष्टा

३ ई अंतस्माहं

~~श्लोक~~

कौशिक उवाच :- मा पुत्रि साहसं कार्षीस्तीर्थमेतदनुत्तमं।
स्नान्ति ये सिद्धियोगेन कर्मेऽस्मिन् पावनं परं ॥

प्राप्नुवन्ति वरं रूपं ते नरा नात्र संशयः ॥ ५१

यदा[1] त्वं पतिता चास्मिन् सिद्धियोगस्तदाभवत् ।
सिद्धियोगे त्वतिक्रान्ते स्नातस्त्वै दयित[2]: पति : ॥ ५२

तेनास्य नाभवद्रूपं यादृशं तव भामिनि ।
साम्प्रतं पतिसंस्कारं कुरु वत्से यथाविधि[3] ॥ ५३

ततस्त्वं सर्वतीर्थेषु स्नान्ती[4] प्राप्स्यसि सद्गतिम्[7]॥ ५४

किरात्युवाच :- वृजन्न[5] तेन दीनाथा[6] मम सम्प्रति किञ्चन ।
न कार्यं विद्यते तीर्थैः स्नानैर्वापि द्विजोत्तम ॥ ५५

तीर्थमेकं हि नारीणां नन्दन्ति[8] भुवि सौमपाः ।
शुश्रूषा जीवतो[9] भर्तु[81]र्मृतस्यानुगतिर्ध्रुवम्॥ ५६

-०-

८ बी ई वदन्ति

१ ई सदा

२ ई दयितोपति

३ ई विधिः

४ ई स्नांति

५ ई वृन्ननदी

६ ई नाथादीनाथा ममसंप्रति

७ ई द्विजसत्तम

९ ई जीविती

(८१) भर्तृ

अतोऽहमनुवर्तिष्ये पतिं लोकान्तरे गतम्।
शिवास्ते सन्तु पन्थानो याहि विप्र नमोऽस्तु ते ।। ५७

कौशिक उवाच :- वरं वृणीष्व भद्रं ते वत्से यन्मनसि स्थितम्।
निकषो ते मया ज्ञातुमिदमुक्तं पतिव्रते ।। ५८

किरात्युवाच :- यदि तुष्टोऽसि मे ब्रह्मन् वरार्हा यदि वाप्यहम्।
तीर्थमेतद्भुवि ख्यातमस्तु भर्तृसंज्ञया ।। ५९

कौशिक उवाच :- कैरातमिति[1] नाम्ना वै सरः ख्यातिं गमिष्यति ।
कृतं यतः किरातेन तीर्थेऽस्मिन् कालसाधनम्।। ६०

अनेन सह कान्तेन किरातेन तवानघे[2] ।
भविष्यत्यचयो लोको गन्धर्वाणां पतिव्रते ।। ६१

इमां यः शृणुयान् मर्त्यः कथां पापप्रणाशिनीम्[3]।
न स प्राप्स्यति दौर्भाग्यं नरकं च नहि[4] यास्यति ।। ६२

-0-

बी १ किरात
२ ई सी त्वयागते
३ ई कथांतेपापनाशनां
४ ई नरकंनयास्यति

वसिष्ठ उवाच :इत्युक्त्वा कौशिको विप्र: स्वं जगाम निवेशनम् ।
तमादाय पतिं साध्वी सा प्रविष्टा हुताशनम् ।। ६३

पतिमुद्धृत्य लोलाक्षी[1] विमानवरमास्थिता ।।
स्तूयमानाऽप्सरोभिश्च गान्धर्वलोकमागता ।। ६४

एतत्ते कथितं राजन् कैरातं तीर्थमुत्तमम् ।
अवगाह्य जलं यत्र सिद्धियोगे नरोत्तम ।।
नारी प्राप्नोति सौभाग्यं नर: पापात्प्रमुच्यते ।। ६५

-०-

इति श्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायाँ ब्राह्मय विभागे तृतीय परिच्छेदे श्रीमाल महात्म्ये कैरातसरो माहात्म्यं नाम एकोनविंशोऽध्याय: ।। १६ ।।

१ ई लोलकाक्षी

श्लोक